संस्कृत ४४२

क्र: नं ४२

याज्ञिक

प्रयोग - स्मार्त

# उपाकर्म

✓ 3752

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥अथ उपाकर्म प्रारंभः॥ श्रीरस्तु॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

उपा० ॥श्रीगणेशायनमः॥ अथउपाकर्मप्रयोगः॥ आचार्यःसुस्नातःआ प्र०
१ चम्यप्राणानायम्यदेशकालौसंकीर्त्यममाधीतानांचाध्येष्यमाणा
नांछंदसामाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंएभिर्ब्राह्मणैःसहउ
पाकर्माख्यंकर्मकरिष्ये॥तदंगस्थंडिलादिसकलकर्मकरिष्ये॥
अग्निंध्यात्वा॥उपाकर्माख्येकर्मणिहोमेदेवतापरिग्रहार्थमन्वा
धानंकरिष्ये॥अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येने
त्यंतमुक्त्वाअत्रप्रधानंसावित्र्यादिदेवताआज्येनअग्निमीळेसमा
नीवइतिप्रधानदेवताः॥दधिसक्तुद्रव्येणशेषेणस्विष्टकृत १
मित्यादिसद्योयक्ष्ये॥यज्ञोपवीतंपरमात्मनेत्यंतमुक्त्वादर्भाग्र

(2A)

हूयप्रक्षेपांतं कृत्वा ॥ दधिसक्तुस्थालीस्थापितपात्रेनिधाय ॥ आ
ज्येन सहोत्रिः पर्यग्निकरणादिप्रधानांतं कृत्वा ॥ आज्याहुतीः
प्राग्वद्धुत्वास्विष्टकृतरग्नुप्रहरणांतं कृत्वादधिसक्तुप्राश्नीयुः
दधिक्रोष्णोवामदेवोदधिक्रावानुष्टुप् ॥ दधिसक्तुप्राशनेविनि
योगः ॥ ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्यवाजिनः ॥ सु
रभिनोमुखाकरत्प्रण आयूंषितारिषत्स्वाहा ॥ यज्ञोपवीत
मितिमंत्रस्य परब्रह्मपरमात्मात्रिष्टुप् ॥ यज्ञोपवीतहोमेवि
नियोगः ॥ ॐ यज्ञोपवीतं परमं पवित्रंप्रजापतेर्यत्सहजंपुर
स्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रं यज्ञोपवीतंबलमस्तु

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai.

(3)

उपा० तेजः स्वाहा ॥ परमात्मानेदं ॥ ब्राह्मणेभ्योदत्वा ॥ स्वयंधारयेयुः ॥ प्राशनं प्र०
२ दधिसक्तुनायुपवीतपरिग्रहः ॥ मार्जनं वेदसंबंधोभवेत्स्विष्टकृतेकृ
ते ॥ इतिशौनकोक्तेः ॥ वेदारंभणतः पूर्वंसक्तुप्राशनतः परं ॥ नवा
न्यज्ञोपवीतानिहुत्वादत्वाचधारयेत् ॥ इतिशौनकोक्तेः ॥ यज्ञोपवी
तदानं ॥ पूर्वोच्चारित० पुण्यांतिथौयज्ञोपवीतधारणंचकरिष्ये ॥
तथाचयज्ञोपवीतअभिमंत्रणंचकरिष्ये ॥ यज्ञोपवीतमितिमंत्रस्यपर
ब्रह्मपरमात्मात्रिष्टुप् ॥ श्रौतस्मार्तकर्मानुष्ठानासिध्यर्थयज्ञोपवीतधा
रणेविनियोगः ॥ ॐ यज्ञोपवीतंपरमंपवित्रंप्र० तेजः ॥ इतियज्ञोपवीत २
संस्कारः ॥ पृथ्वीतिमंत्रमेरुपृष्ठऋषिः ॥ कूर्मोदेवता ॥ सुतलंछंदः ॥

...joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

आसनेन वि०॥ ॐ पृथ्वी त्वया धृता लोका०॥ तेनैव मंत्रेण॥ ततः परिस्तर
णानामधस्तात् दंजलिस्थान्कुशा॥ दक्षिणकटौ निवेश्य॥ उपाकृतावै वेदाः॥
आचार्यः प्रायश्चित्तादिहोमशेषं समाप्य॥ ततः वेदस्त्रीस्वर्थ ब्राह्मणान्भो
जयेत्॥ नानानामगोत्रेभ्यो ब्राह्मणेभ्यः भूयसीं दक्षिणां दातुमहमुत्सृ
जेत्॥ कर्मद्वयमिदं केचि लौकिकाग्नौ प्रयुंजते॥ इति उपाकर्मप्रयो
गः॥ छ॥ नूतनब्रह्मचारिणो विशेषः॥ पूर्वोच्चरित० अस्य ब्रह्मचारि
णो वेदग्रहणासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं उपाकर्माख्यं कर्म क
रि०॥ तदंग गणपतिपूजनपूर्वकं स्वस्तिपुण्याहवाचनं नांदीश्राद्धं
च कृत्वा॥ यज्ञोपवीतधारणं॥ नवानि कटिसूत्रं कौपीनं वस्त्रं मेख

मातृकापूजनं

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

उपा० त्वा दंडाजिनानि धारयेदिति ।। पुराणानि विसृज्य ।। इति ब्रह्मचारी वेद प्र०
३ ग्रहणं ।। छ ।। अथ सभादीपदानविधिः ।। अमुक स्वच्छेत्यादि पुण्य
तिथौ ।। मम इह जन्मनि जन्मांतरे च दीर्घायुष्यः सपुत्रश्री सौभाग्या
वैधव्यादि सभादीपोक्त अनेक फलावाप्तिकामोहं श्री ब्रह्मा विष्णु रु
द्र प्रीत्यर्थं ब्राह्मण सभायां ब्राह्मणाय सभादीपदानमहं क० ।। तदंग
गणपतिपूजनं ब्राह्मण पूजनं च करिष्ये ।। दीपदेवताभ्यो नमः ध्या
नादिमंत्र पुष्पांत पूजां कृत्वा ।। ब्राह्मणपूजनं कृत्वा ।। दान मंत्राः ।।
भो दीप ब्रह्म रूपस्त्वं ज्योतिषां प्रभुरव्ययः ।। आरोग्यं देहि पुत्रांश्च अ ३
वैधव्यं प्रयच्छ मे ।। १ ।। श्रावणे मास्यपाकर्मण्यारब्धे विप्रसंसदि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(45)

व्रीहितंदुलपिष्टस्यास्किंचित्संकजानिर्मितं ॥२॥ घृतवर्त्यग्निसंयुक्ते
विमले कांस्यभाजने ॥ सपात्रतंदुलप्रस्थं पूरितं सप्रतिष्ठितं ॥३॥
अवैधव्यं सपुत्रत्वं दीर्घायुः श्रीसरस्वतये ॥ सभादीपप्रदास्येहं
तुभ्यं विप्र सदक्षिणं ॥४॥ ब्रह्मा विष्णु महेशाश्च प्रीयतां दीपदा
नतः ॥ ममाभिष्टप्रदाः संतु भवो स्मिन्नाभवांतरे ॥५॥ सर्वकाम
प्रदा नृणां दीपदानप्रदीपितः ॥६॥ श्रावण्यां श्रवणे रक्षे सभाया
मग्निसंनिधौ ॥ सभादीपप्रदानेन मम नः शांतिं प्रयच्छमे ॥७॥ विप्रा
यवेदवि० ॥८॥ देवस्य त्वेति० ॥९॥ इदं सभादीपदानं सदक्षिणा
कं सतांबूलं अमुकशर्मणे ब्राह्मणाय तुभ्य महं संप्रददे ॥ प्रतिग्र

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratisthan, Mumbai.

(5)

उपा॰ ४

ह्यतां ॥ प्रतिगृह्णामि ॥ दानसांगतासिध्यर्थं इमां दक्षिणां तुभ्यंम प्र॰
हं संप्रददे ॥ अनेन सभादीपदानेन श्रीपरमेश्वरः प्रीयतां न म
म ॥ तेन श्री ब्रह्माविष्णुमहेश्वरः प्रीयतां ॥ इति सभादीपदानं ॥
इति उत्सर्जनोपाकर्मप्रयोगः ॥ श्रीकृष्णार्पणमस्तु ॥ शके १७
८७ क्रोधननामसंवत्सरे माहे मार्गशीर्ष वद्य १३ शुक्रवासरे त
द्दिने समाप्तः ॥ इदं पुस्तक चंदनइत्युपनामक अबाभट्टात्मज
भिकंभटस्येदं ॥ शालिग्रामोपनामा [illegible] दामोदरात्मज रामचं
द्रेण लिखितं ॥ स्वार्थं परमार्थं च ॥ श्रीकृष्णार्पणमस्तु ॥ छ ॥ ४

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ... Mumbai

(६)

॥ इतिउपाकर्मप्रयोगसमाप्तः॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com